# श्रीमद्भागवतानुसृतः ग्रहविचारः

सु. मुरलिः*

**सारांशः -**

यत्र भागवतं भवति तत्र भगवान् प्रादुर्भवति इति उक्तत्वात् वेदसमान मुख्यत्वं अस्मिन् भागवतपुराणे वेदाङ्गभूतज्योतिषविषयाः बहवः तत्र तत्र सुविचारिताः वर्तन्ते। तेषु ग्रहाणां स्थितिः एवं तेषां गतिविषयः अपि अन्यतमः वर्तते । तत्र सूर्यस्थितिविचारः वर्तते “स एष भगवान् आदिपुरुषः एव नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमाने द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यतोपजोषमृगुणान् विदधाति”। अत्र सूर्यः इत्यर्थे “ सः “ इति पदम् उपयुक्तं वर्तते। सः आदित्यः एव भगवान् विष्णुः। अस्य लोकस्य मङ्गलार्थं एवं वेदेषु उक्तत्रिविधकर्मविशुद्धिनिमित्तम् आत्मानं द्वदशधा विभज्य सर्वप्राणिनां स्वस्तये च वसन्तादिषु षट्सु ऋतुषु यथा कर्मभोगं ऋतुगुणान् शीतोष्णादीन् विदधाति।

**कुञ्जीशब्दाः -** वेदाङ्गम्, ज्योतिशास्त्रम्, सिद्धान्तः, संहिता, होरा, त्रिस्कन्धाः, त्रिकालफलकथनम्, कालनिर्णयः, वास्तुः, शुभाशुभविषयाः, खगोलः, गणितम्, श्रीमद्भागवतमहापुराणम्।

---

वेदाङ्गभूतज्योतिशास्त्रस्य सहायता लोके सर्वेषां कस्मिन्नपि मार्गे अपेक्षा अस्ति एव मनुष्याणां मुख्यभूतानां केषाञ्चन कर्मणां करणाय एवं तत्फलचिन्तनाय इति बहुमुखोपकाराः अनेन सन्ति। शास्त्रेस्मिन् सिद्धान्तः संहिता होरा इति त्रिस्कन्धात्मकभेदेन चराचराणां त्रिकालफलकथनम् कालनिर्णयं वास्तुद्वारा दिगधिष्ठित शुभाशुभविषयाः खगोलविषयाः गणितम् इत्यादि सुदीर्घा विषयावली विचारिता वर्तते। वेदे पठितत्वात् वेदानुसारिषु इतिहासपुराणादिष्वपि अस्य शास्त्रस्य विचाराः बहुधा दृश्यन्ते इति विद्वद्भिः विदितमेव। एवं वेदानुसारग्रन्थेषु “भागवतपुराणम्” प्रधानं स्थानं वहति। यतो हि -

**यत्र यत्र भवेत् पुण्यं शास्त्रं भागवतं कलौ।**
**तत्र तत्र सदैवाहं भवामि त्रिदशैः सह[1] ॥**

यत्र भागवतं भवति तत्र भगवान् प्रादुर्भवति इति उक्तत्वात् वेदसमान मुख्यत्वं अस्मिन् भागवतपुराणे वेदाङ्गभूतज्योतिषविषयाः बहवः तत्र तत्र सुविचारिताः वर्तन्ते। तेषु ग्रहाणां स्थितिः एवं तेषां गतिविषयः अपि अन्यतमः वर्तते। तत्र सूर्यस्थितिविचारः वर्तते एवम् - **"स एष भगवान् आदिपुरुषः एव नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमाने द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यतोपजोषमृगुणान् विदधाति " [2]॥**

अत्र सूर्यः इत्यर्थे " सः " इति पदम् उपयुक्तं वर्तते। सः आदित्यः एव भगवान् विष्णुः। अस्य लोकस्य मङ्गलार्थं एवं वेदेषु उक्तत्रिविधकर्मविशुद्धिनिमित्तम् आत्मानं द्वदशधा विभज्य सर्वप्राणिनां स्वस्तये च वसन्तादिषु षट्सु ऋतुषु यथा कर्मभोगं ऋतुगुणान् शीतोष्णादीन् विदधाति इत्यर्थः।

**"अतः स एव आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादशमासान् भुङ्क्ते राशिसंज्ञान् संवत्सरावयवान् न्यासः पक्षद्वयम् दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः" ॥** [3]

मासादीनां व्यवहारहेतुः सूर्यः एव इति अत्र उपदिशन्ति। स्वर्गभूम्योः मध्ये आकाशे मेषादिद्वादशराशियुक्तं कालचक्रं भुङ्क्ते इति। ते च राशयः माससंज्ञात्मकाः भवन्तीत्यतः संवत्सरावयवभूत राशीनां भोगद्वारा मेषादि मासमानं द्योतयति अयम्। चान्द्रमानरीत्या पक्षद्वयं एकः मासः , एवञ्च पितृणां दिवा नक्तञ्च भवति। एकस्मिन् राशौ सपादनक्षत्रद्वयं वर्तते तद्भोगकालः एकः सौरमासः इति। ३६० भागात्मकराशिचक्रस्य षठांशभोगकालः अर्थात् ६० भागभोगकालः एकः ऋतुः इति अभिधीयते सोपि संवत्सरावयः। **"अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं कालम् अयनम् आचक्षते"** ।[4]

सूर्यः यावत्कालं आकाशमण्डले विद्यमानद्वादशराशिषु अर्धं भुङ्क्ते तावान्कालः एव अयनमिति उच्यते। **"अथ च यावन्नभोमण्डल सह द्यावपृथिव्योर्मण्डलाभ्यां कात्स्र्न्येन सह भुञ्जीत तं कालं संवत्सर परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः समामनन्ति ॥**[5] एवञ्च स्वर्गपृथिवीमण्डलसहितं राशिचक्रं पूरयितुं सूर्यः स्वकीय मन्द - शीघ्र - सम इत्यादि गतिभेदेन यावन्तं कालं स्वीकरोति तावन्तं कालमेव परिवत्सरम् , इडावत्सरम् , अनुवत्सरम् , वत्सरमिति च वदन्ति। तथा च श्रीमद्भागवते महापुराणे चन्द्रगतिम् तस्य स्थितिञ्च

---

[1] श्री.भा.मा - १५

[2] श्री.भा.स्क ५. २२ .३

[3] श्री . भा. स्क ५ . अ २२ . श्लो ५

[4] श्री . भा. स्क ५ . अ २२ . श्लो ६

[5] श्री . भा. स्क ५ . अ २२ . श्लो ७

विचारयन्ति **"एवं चन्द्रमा अर्कगभस्तिभ्यः उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते"** ।।[6]

अर्कमण्डलात् लक्षयोजानात्मकदूरे विद्यमानः अयं चन्द्रः अर्केण द्वादशमासात्मके काले क्रियमाणां भगनपूर्तिं केवलं पक्षाभ्यां पूरयति । एवमेव सूर्येण त्रींशत्दिनात्मके काले क्रियमाणां राशिपूर्तिं चन्द्रः सपाददिनद्वये एव पूरयति । अतिवेगगामी अयं चन्द्रः कदाचित् सूर्यस्य एकपक्षभुक्त्यात्मकभागम् अर्थात् १५ भागम् एकस्मिन् दिने एव पूरयति। **"अथ चापूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैः भुङ्क्ते"** ।।[7]

आपूर्यमाणाभिः कलाभिः इति शुक्लपक्षं सूचयन्ति । शुक्लपक्षः अमराणाम् अहः भवति , कृष्णपक्षः तेषां रात्रिश्च । एवं क्षियमाणाभिः कलाभिः अर्थात् कृष्णपक्षः पितृणां अहः भवति , शुक्लपक्षः तेषां रात्री । प्राणिसमूहानां प्राणाः सर्वौषधपोषकत्वात् एवं जीवः इत्यपि चन्द्रं कथयन्ति । सः जीवः चन्द्रः त्रिंशन्मुहूर्तैः एकं नक्षत्रं भुङ्क्ते । एकस्मिन् मुहूर्ते ४८ निमेषाः सन्ति तर्हि २४ होरात्मककाले १३.२० भागात्मकं एकं नक्षत्रं भुङ्क्ते इति। **"ततः उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः"** ।।[8]

चन्द्रादुपरि त्रिलक्षयोजनात्मकदूरे अभिजिन्नक्षत्रेण सहितानि अश्विन्यादि अष्टविंशति नक्षत्राणि कालचक्रे ईश्वरेण योजितानि मेरुं सर्वदा प्रादक्षिण्येन भ्रमन्ति । अभिजित् नक्षत्रस्य प्रमाणं अस्त्येवं ज्योतिषशास्त्रे **"गोविन्दाद्यघटीचतुष्कसहितो विश्वान्त्यपादोऽभिजित्"**[9] इति गोविन्दः श्रवणानक्षत्रम् विश्वम् उत्तराषाढानक्षत्रम् । श्रवणानक्षत्रस्य आद्यं घटिचतुष्टयम् एवम् उत्तराषाढानक्षत्रस्य अन्त्यपादमात्रम् अर्थात् पञ्चघटिकाकालः इति आहत्य १६ घटिकाकालः अभिजित् नक्षत्रमिति । **"तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्य साम्याभिगतिभिरर्कवच्चरति लोकानां नित्यदानुकूलः एव प्रायेण वर्षयश्चारेणानुमीयते स वृष्टिविष्टम्भ गृहोपशमनः"** ।।[10]

ततः नक्षत्रमण्डलात् द्विलक्षयोजनात्मकदूरे उशना (शुक्रः) अस्ति । स च शुक्रः सर्वदा सूर्यस्य पूर्वाऽपरनिकटवर्ती भवति । सूर्यस्य यथा मन्द - शैघ्र्य - सम इत्यादि गतयः सन्ति तद्वदेव अस्यपि वर्तते ।अयं शुक्रः लोकानां नित्यं अनुकूलकर्ता एवम् अस्य चारेण एव प्रायशः वृष्टिचिन्तनं भवति इति । **"उशनसा बुधो व्याख्यातस्तत उपरिष्टात् द्विलक्षयोजनतो बुध सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद् व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते"** ।।[11]

[6] श्री . भा. स्क ५ . अ २२ . श्लो ८

[7] श्री . भा. स्क ५ . अ २२ . श्लो ६

[8] श्री . भा. स्क ५ . अ २२ . श्लो ११

[9] मुहूर्तपदवीग्रन्थस्य व्याख्याने अस्ति

[10] श्री . भा. स्क ५ . अ २२ . श्लो १२

[11] श्री . भा. स्क ५ . अ २२ . श्लो १३

शुक्रात् उपरि द्विलक्षयोजनात्मकदुरे बुधः चन्द्रसुतः अस्ति। अयम् प्रायशः लोकस्य शुभकृत् एव , परन्तु यदा सूर्येण सह न चरति तद अतिवातः , अनावृष्टिः इत्यादि भयं सूचयति। परन्तु शुक्रबुधौ सर्वदा सूर्येण सहैव वर्तेते। तदुक्तं वराहमिहिरचार्येण,**"चतुर्थेभवने सूर्यात् ज्ञसितौ भवतः कथम्"**[12] इति । **"अत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीद्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः" ॥**[13]

शुक्रात् उपरि द्विलक्षयोजनात्मकदूरे अङ्गारकः भवति ।अयं यदि वक्रो नास्ति तदा पक्षत्रये अर्थात् ४५ दिनेषु एकं राशिं भुङ्क्ते। एवमेव ५४० दिनेषु द्वादशराशीन् भुङ्क्ते। प्रायेण अशुभग्रहः अयं अशुभमेव सूचयति । वराहमिहिराचार्याः अपि वदन्ति एवम् **"क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापाः बुधस्तैर्युतः"**[14] इति।

**" ततः उपरिष्टात् द्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिः एकैकस्मिन् राशौ परिवत्सरं परिवत्सरं चरति यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य"।।**[15] तत उपरिष्टात् द्विलक्षयोजनात्मकदूरे बृहस्पतिः ( गुरुः) वर्तते ।यद्ययं वक्रो नास्ति तर्हि एकस्मिन् राशौ एकं वत्सरं चरति । अयं प्रायशः ब्राह्मणकुलस्य अनुकूलकर्ता भवति । उक्तञ्च वराहमिहिराचार्येण **"विप्रादित शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्त्यजानाम्"**[16]इति॥

**"तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चरः एकैकस्मिन् राशौ त्रिंशन्मासान् विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः" ॥**[17] बृहस्पतेः उपरि द्विलक्षयोजनात्मकदूरे शनिः अस्ति। अयम् एकैकस्मिन् राशौ त्रिशन्मासाः अर्थात् वर्षद्वयं चरति । तेषु कालेषु सः सर्वेषां प्रायः दुःखकरः भवति इति । **"तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभयन्ते य एव लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं परिक्रमन्ति" ॥**[18] शनेः उपरि एकादशलक्षयोजनात्मकदूरे सप्तर्षयः उपलभ्यन्ते। ते च लोकानां शं सुखं सम्पादयन्तः भगवतः विष्णोः परमं पदं प्रदक्षिणम् परिभ्रमन्ति इति॥ अत्रोक्त ग्रहस्थितिक्रमः सूर्यसिद्धान्ते विचारितः वर्तते एवम् -

**ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाऽभिधीयते**
**तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा॥**
**मन्दामरेज्य- भूपुत्र –सूर्य शुक्रेन्दुजेन्दवः**
**परिभ्रमन्त्यधोऽधः स्थाः सिद्धाः विद्याधराः घनाः॥**

---

12 बृ . अ . १२ . श्लो .६
13 श्री . भा. स्क ५ . अ २२ . श्लो १४
14 बृ . अ . २ . श्लो .५
15 श्री . भा. स्क ५ . अ २२ . श्लो १५
16 बृ . अ . २ . श्लो .७
17 श्री . भा. स्क ५ . अ २२ . श्लो १६
18 श्री . भा. स्क ५ . अ २२ . श्लो १७

भागवते सूर्यात् उपर्युपरि ग्रहाः भवन्ति इति विचारितं परन्तु सूर्यसिद्धान्ते सूर्यादुपरि शनिः गुरुः कुजः इति त्रयः तस्य अधः शुक्रः बुधः चन्द्रः च पठिताः वर्तन्ते । सूर्यापेक्ष्या चन्द्रः भूमिनिकटवर्ती इत्यतः एव सः राशिमण्डलं शीघ्रं पूरयति इति समाधानम् अपि सैद्धान्तिकाः वदन्ति।

**सन्दर्भग्रन्थसूची -**


1. श्रीमद्भागवतमहापुराणम् , गीताप्रेस , गोरखपुर .
2. बृहज्जातकम्
3. मुहूर्तपदवी
4. सूर्यसिद्धान्तः


**सङ्केताक्षरसूची :-**

1. श्री.भा - श्रीमद्भागवतम्।
2. स्क - स्कन्धः।
3. अ - अध्यायः।
4. श्लो - श्लोकः।
5. बृ - बृहज्जातकम्।

*ज्योतिषविभागः, मद्रपुरीसंस्कृतकलाशाला, चेन्नै।